दिनाङ्क : 09/08/2025 सायम् : - 06:20

<u>आदौ-मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा नरेन्द्रमोदिना गृहमन्त्रिणा अमितशाहेन च काकोरीरेलकाण्डस्य शतवर्षपूर्त्यवसरे क्रान्तिकारिभ्यः श्रद्धाञ्जलिः समर्पितः।

· वायुसेनायाः प्रमुखः ए.पी. सिंहः प्रोक्तवान् यत् सिन्दूराभियानावधौ भारतीयवायुसेनया पाकिस्तानस्य पञ्चयुद्धविमानानि ध्वस्तानि।

· भारतस्य रक्षानिर्यातः गतवर्षे त्रयोविंशति-सहस्र- कोटिरूप्यकाणि सञ्जातम्। आगामिषु त्रिवर्षेषु द्विगुणीभविष्यति इत्यनुमीयते।

· प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रावणपूर्णिमायाः शुभावसरे विश्व-संस्कृतदिवसस्य समेभ्यः देशवासिभ्यः शुभकामनाः प्रकल्पिताः।

· भातृभगिन्योः उत्सवः रक्षाबन्धनम् अद्य अशेषे हि देशे पारम्परिकोत्साहेन हर्षोल्लासेन चानुष्ठीयते ।

<u>अथ वार्ताः विस्तरेण</u>

<u>उत्तरप्रदेश-काकोरी</u>

उत्तरप्रदेशे अद्य काकोरीरेलकाण्डस्य वर्षपूर्त्यवसरे विभिन्नाः कार्यक्रमाः आयोजिताः। उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगी-आदित्यनाथेन घटनेयं वीरतायाः गाथात्वेन प्रतिपादिता सहैव नागरिकाः च "राष्ट्रप्रथमः" इत्यनया भावनया प्रेरिताः। प्रधानमन्त्रिणा नरेन्द्रमोदिना गृहमन्त्रिणा अमितशाहेन च काकोरीरेलकाण्डस्य शतवर्षपूर्त्यवसरे क्रान्तिकारिभ्यः श्रद्धाञ्जलिः समर्पितः।

## प्रधानमन्त्री-कर्नाटकः

प्रधानमन्त्री नरेन्द्रमोदी श्वः कर्नाटकस्य एकदिवसीययात्रायै गमिष्यति । अत्रावसरे श्रीमोदी बेंगलुरुनगरस्य के-एस-आर-रेलस्थानके त्रिभ्यः वन्दे-भारत-द्रुतरेलयानेभ्यः हरितपताकां प्रदर्शयिष्यति। अवधेयास्पदमिदं यत् एतेषु रेलयानेषु बेंगलुरुतः बेलगामं यावत्, अमृतसरात् मातावैष्णोदेवी कटरां यावत्, तथैव नागपुरतः पुणेनगरं यावत् गम्यमानानि रेलयानानि सन्ति। अतः परं सः बेंगलुरुनगरे मेट्रोयानस्य येलो-लाइन इति पीतवर्णीयरेखायै हरितपताकां प्रदर्शयिष्यति। प्रधानमन्त्री बेंगलुरुनगरे नगरीयसम्पर्कपरियोजनानां का उद्घाटनं शिलान्यासञ्च विधाय एकां सार्वजनिकसभामपि सम्बोधयिष्यति। श्रीमोदी दशाधिक-षड्शतोत्तर-पञ्चदशसहस्रकोटिरुप्यतोऽप्यधिकानां बेंगलुरुमेट्रोयानस्य तृतीयचरणस्य परियोजनानां आधारशिलां स्थापयिष्यति ।

## कर्नाटक-वायुसेनाप्रमुखः

वायुसेनायाः प्रमुखः एयर-चीफ-मार्शल- ए.पी. सिंहः प्रोक्तवान् यत् सिन्दूराभियानावधौ भारतेन पाकिस्तानस्य पञ्चयुद्धविमानानि ध्वस्तानि। अद्य बेंगलूरुनगरे आयोजिते षोडशे एयरचीफ-मार्शल-एल.एम.-कात्रे-व्याख्याने वायुसेनायाः प्रमुखेण प्रोक्तं यत् भारतेन पाकिस्तान-वायुसेनायाः पञ्चविमानानि सहैव एकम् अवाक्स-विमानञ्च ध्वस्तीकृतम्।

वायुसेनाप्रमुखेण विज्ञापितं यत् जेटविमानानि तावत् त्रिशतकिलोमिटरमितात् दूरादेव निपातितानि। सः शाहबाज़-जैकबाबाद्वायु-पत्तनेषु भारतीय-प्रक्षेपास्त्रैः कृतस्य आक्रमणस्यापि उल्लेखम् अकरोत्, यत्र एफ16 सदृशाणि विमानानि क्षतिग्रस्तानि अभवन्।

## भारतस्य-रक्षानिर्यातः

भारतस्य रक्षानिर्यातः गतवर्षे त्रयोविंशति-सहस्र-कोटिरूप्यकाणि सञ्जातम् । तेषां निर्यातः आगामिषु त्रिवर्षेषु द्विगुणीभविष्यति इत्यनुमीयते । डायट इत्यस्य चतुर्दश-दीक्षान्त समारोहानन्तरं अद्य पुणेनगरे वार्ताहरसम्मेलनं सम्बोधयन् , रक्षा-अनुसन्धान-विकास-विभागस्य सचिवः डॉ. समीर-कामतः अवदत् यत् भारतीय-रक्षा-उपकरणानाम् अत्यधिक-अपेक्षा मध्य-पूर्व-अफ्रीका-दक्षिण-एशिया-देशेषु च प्रवर्धते। सः अवदत् यत् ब्रह्मोस्-क्षेपणास्त्रस्य लघुसंस्करणविकासस्य कार्यं प्रचलति, अपरत्र ज़ोरावर -टैङ्क इत्यस्य विकासः अपि द्रुतगत्या प्रचलति। सः अवदत् यत् सिन्दूराभियानावधौ डीआरडीओ-द्वारा विकसित उपकरणमाध्यमैः भारतीय-सशस्त्र-सैन्यबलेन साफल्यं अधिगतम् । क्षेपणास्त्र-उपकरण-उत्पादनेषु पूर्णरूपेण - आत्मनिर्भरतां प्राप्तुं रक्षा-उद्योगेन शैक्षिक-संस्थाभिः च सहयोगेन पञ्चदश उत्कृष्टकेन्द्राणि स्थापितानि सन्ति ।

## प्रधानमन्त्री-संस्कृतदिवस:

प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रावणपूर्णिमायाः शुभावसरे विश्व-संस्कृतदिवसस्य समेभ्यः देशवासिभ्यः शुभकामनाः प्रकल्पिताः। एकस्मिन् सोशल-मीडिया-सन्देशे श्रीमोदिना प्रकाशितं यत् संस्कृतं ज्ञानस्य अभिव्यक्तेश्च शाश्वतस्रोतमस्ति । सहैव अस्य प्रभावः सर्वेषु क्षेत्रेषु द्रष्टुं शक्यते। तेनोदीरितं यत् विगते एकस्मिन् दशके सर्वकारेण संस्कृतस्य लोकप्रियतायै बहवः पदक्षेपाः सन्धारिताः। तत्र तावत् केन्द्रीयसंस्कृतविश्वविद्यालयानां संस्कृतशिक्षणकेन्द्राणाञ्च स्थापनम्, संस्कृतविद्वद्भ्यः अनुदानप्रदानम्, पाण्डुलिपीनां प्राविधीकरणेन सम्बन्धितं ज्ञान-भारताभियानम् इत्येतानि अभियानानि सम्मिलितानि सन्ति। प्रधानमन्त्रिणा विज्ञापितं यत् अनेन बहवः विद्यार्थिनः शोधकर्तारश्च लाभं अवाप्नुवन्। तेन एतदपि प्रोक्तं यदनेन प्रत्येकव्यक्तिनः सहयोगस्य महत्वं दृष्टिपथमायाति।

## उत्तराखण्ड-रक्षाप्रवर्तनम्

उत्तराखण्डस्थ उत्तरकाशी-जनपदस्य धराली-हरसिलक्षेत्रयोः बृहत्स्तरे आपदुद्धरणकार्याणि जायमानानि सन्ति। विमानसेवाभिः, आधुनिक-प्रविधिना उपकरणैश्च रक्षाकर्मिणः रक्षाभियाने संलग्नाः सन्ति। एतावता सप्तपञ्चाशदधिक-सप्तशतजनाः रक्षाकर्मिभिः संरक्षिताः। आपत्प्रभावितयोः धराली-हरसिलक्षेत्रयोः सेनायाः, एनडीआरएफ-बलस्य एसडीआरएफ-बलस्य आरक्षक-बलस्य स्थानीय-प्रशासनस्य च सहयोगेन तीर्थयात्रिणां स्थानीयनिवासिनाञ्च रक्षणार्थं आपदुद्धारकार्यं जायमानमस्ति। आवश्यक-सामग्र्यः उदग्रयानस्य माध्यमेन प्रभावितक्षेत्रेषु प्राप्यमानाः सन्ति। एतदतिरिच्य विद्युत्-जल-स्वास्थ्यसेवा-मार्गसम्पर्कं प्रापणार्थं युद्धस्तरे प्रयासाः जायमानाः सन्ति।

## प्रधानमन्त्री-भारतछोड़ोआंदोलनम्

प्रधानमन्त्रिणा अद्य महात्म-गान्धिनः प्रेरकनेतृत्वे भारत-छोड़ो-आन्दोलने सहभागिभूतेभ्यः समेभ्यः वीरेभ्यः आभारः प्रकटीकृतः। श्रीमोदिना कथितं यत् तेषां शौर्येण देशभक्तेः तादृशः अङ्गारकः प्रज्वालितः येन असंख्याकाः जनाः स्वतन्त्रतायै एकीभूताः अभवन्।

## राष्ट्रपति-रक्षाबन्धनम्

भ्रातृभगिन्योः उत्सवः रक्षाबन्धनम् अद्य अशेषे हि देशे पारम्परिकोत्साहेन हर्षोल्लासेन चानुष्ठीयते। अवसरेऽस्मिन् भगिन्यः स्वभ्रातुः हस्ते रक्षासूत्रं बध्नन्ति सहैव तेषां दीर्घायुष्याय च प्रार्थयन्ति। अत्रावसरे राष्ट्रपतिः द्रौपदीमुर्मूः प्रधानमन्त्री नरेन्द्रमोदी च देशवासिभ्यः शुभकामनां प्रकल्पितवन्तौ। राष्ट्रपतिना प्रोक्तं यदयं महोत्सवः समाजे सद्भावं एकतां च वर्धयति सहैव भ्रातृभगिन्योः मध्ये प्रेम्णः विश्वासस्यापि प्रतीकः अयमुत्सवः वर्तते। राष्ट्रपतिः देशवासिनां आह्वानमकरोत् यत्ते समृद्धराष्ट्रनिर्माणार्थं संकल्पबद्धाः भवेयुः, येन स्त्रियः सुरक्षिताः अनुभवन्त्यः राष्ट्रविकासे सक्रिययोगदानं दद्युः।